IJCRT.ORG ISSN : 2320-2882

INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)

An International Open Access, Peer-reviewed, Refereed Journal

# संस्कृतसाहित्ये उत्तराधुनिकभावधारायाः पदचिन्हम्

# "Saṃskṛta-Sāhitye Uttar-Ādhunika-Bhāva-Dhārāyāḥ Padacihnam"

**SAURAV RAY**
PHD RESEARCHER
SHREE LAL BAHADUR SHASTRI NATIONAL SANSKRIT UNIVERSITY

## सौरभ राय[1]

संस्कृतसाहित्यं एकं समृद्ध-प्राचीन-परम्परानुसारि-वैज्ञानिक-मानविक-सांस्कृतिक-उन्नतचिन्तायुक्तं साहित्यम्। यस्य सूचना सम्भवतः ख्रिस्टजन्मस्य द्वि-त्रिसहस्रवर्षस्य अपि पूर्वे अभवदिति पण्डितैरभिमतम्[2]। संस्कृतसाहित्यमिदं भारतीय सभ्यतायाः संस्कृतेश्च धारक-वाहक-मूलस्तम्भस्वरूपश्च। ज्ञानस्याकरस्वरूपं संस्कृतसाहित्यं वेदादिशास्त्रेभ्यः आरम्भकृता अधुना पर्यन्तं यस्य गतिः अव्याहतः अस्ति। संस्कृतभाषायां वेदोपनिषदादिप्राचीनालौकिकशास्त्रग्रन्थ- रामयणमहाभारतादिरसादृतवर्णनामयमहाकाव्य- अभिज्ञानशकुन्तलमादिश्रेष्ठसाहित्यनाटक- मेघदूतादिगीतिकाव्य- वेदान्तादिदर्शनग्रन्थ- नाट्य- शास्त्रकाव्यप्रकाशादिकाव्यशास्त्र- पातञ्जलयोगसूत्रादियोगग्रन्थ- चाणक्यनीत्यादिनीतिग्रन्थ-सूर्यसिद्धान्तादिखगोलीयग्रन्थ-चरकसंहितासुश्रुतसंहिताद्यायुर्वेदग्रन्थसदृशः ज्ञानसमृद्धचित्ता- कर्षकानेक ग्रन्थाः सन्ति। वर्तमाने संस्कृतसाहित्ये स्वीयकाव्यविधया सह विश्वसाहित्यस्य प्रायः सर्वे काव्यविधान् प्राप्यन्ते।

पूर्वे संस्कृतसाहित्यं धर्मार्थकाममोक्षः इति चतुवर्गेन जीवनस्य अर्थानुसन्धानेन, शास्त्रोक्तानीतिना सह भारतीय ऐतिह्य-सामाजिकमूल्य-आदर्शं केन्द्रयित्वा आवर्तित अभवत्। साहित्यं सर्वदा युगानुसारी, समाजानुसारी च भवति। कालचक्रस्य प्रभावात् देश-काल-रीति-नीति-समाज-मानविकमूल्य-रुचिः इत्यादिनां परिवर्तनेन सह आधुनिकसंस्कृतसाहित्ये अपि विविधपरिवर्तनं विवर्तमञ्च लक्ष्यते। उत देशीय विदेशीय च साहित्येन सह गभीरसंयोगवशात् संस्कृतसाहित्यस्य प्रभावः तयोरुपरि, तयोः प्रभावः संस्कृतसाहित्यस्य उपरि च स्पष्टतया अधुना दृश्यते। संस्कृतसाहित्यस्य उपरि विश्वसाहित्यस्य विविधप्रभावेषु उत्तराधुनिकता (Postmodernism) एक

---

[1] शोधच्छात्रः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः

[2] संस्कृत साहित्येर इतिहास, पृष्टा- २,३

अन्यतम प्रभावः। हर्षदेवमाधव-केशवचन्द्रदाश-वनमालीविश्वल-प्रमोदकुमार-अरुणरञ्जनमिश्र-नारायणदाश-प्रवीणपाण्ड्या-ऋषिराजादीनां काव्ये रचनायां वा उत्तराधुनिकतायाः प्रभावं दरीदृश्यते।[3]

उत्तराधुनिकता अस्ति एका क्लिष्टसांस्कृतिक वहुविधासाहित्यिक च आन्दोलनं, या विंशशतकस्य मध्यवर्तिनीसमये आविर्भूतमभवत्। आधुनिकतावादस्य आदर्श-मूल्यबोध-प्रभावशीलसांस्कृतिकनान्दनिकदृष्टान्तस्य प्रतिक्रिया स्वरूपः उत्तराधुनिकतावादस्य उद्भवः विकासश्च। उत्तराधुनिकतावादः आधुनिकतावादतः एकः सम्पूर्णः भिन्नः मतवादः। आधुनिकतावादस्य शिल्पतः साहित्यतः तत्वस्य वस्तुनिष्ठतः सर्वजनीयसत्यतायाः धारणातः उत्तराधुनिकता एका प्रस्थानरेखां निर्देशति। आधुनिकतावादः यः एकोनविंशतिशतकस्यान्तिमार्धे विंशशतकस्य प्रथमार्धे आविर्भुतमभवत्, स व्यक्तिवादः, आत्मवादः तथा द्रुतपरिवर्तनशीलस्य विश्वस्य अर्थानुसन्धास्योपरि अधिकं गुरुत्वं दृष्टिपातं वा आरोपयति। अपरपक्षे उत्तराधुनिकतावाद अस्य आधुनिकतावादस्य मूल्यवोधानाम् अनेकान् न स्वीकरोति। उत एकम् एकलवस्तुनिष्ठसत्यस्य धारणां स्पर्धा करोति, भाषा-संस्कृति-इतिहासेन रचितं विश्वमुपलब्धेः पथानुसन्धानं करोति। अस्य उत्तराधुनिकवादस्य धारणां सिद्धान्तं वा मनसिकृत्वा साहित्यिका यदा साहित्यं रचयति तदा तद् साहित्यम् उत्तराधुनिकसाहित्यमिति आख्यायां भूषयति। प्रत्येकसाहित्यस्य निजस्व वैशिष्ट्यं विद्यते, तेनैव तस्य साहित्यस्य परिचयं प्राप्यते। यस्मिन्साहित्ये आधुनिकतायाः वैशिष्ट्यं विद्यते स आधुनिकसाहित्यं, यत्र उत्तराधुनिकताया वैशिष्ट्यं प्राप्यते स उत्तराधुनिकसाहित्यम् इति कथ्यते।

उत्तराधुनिकतायाः प्रभावः साहित्ये, स्थापत्ये, शिल्पे, नगरपरिकल्पनायां, संस्कृत्यां चेत्यादि क्षेत्रे दृश्यते। उत्तराधुनिकतावादस्य दार्शनिकतत्त्वोऽपि अस्ति। विश्वसाहित्ये उत्तराघुनिकसाहित्यानां परिशीलनं कृत्वा यानि वैशिष्ट्यानि विद्वद्भिः प्राप्यन्ते तेषु किञ्चित् वैशिष्ट्यानि अधुनासंस्कृतसाहित्येऽपि दृश्यते। आधुनिकसंस्कृतसाहित्यस्य उत्तराधुनिकवैशिष्ट्यानामन्वेषणं तथा आधुनिकसंस्कृतसाहित्ये उत्तराधुनिकतायाः वैशिष्ट्यानाम् आलोचनात्मकः व्याख्यात्मकश्च पद्धत्या व्याख्याप्रदानम् अस्य प्रपत्रस्य उद्देश्यम्।

आधुनिकसंस्कृतसाहित्ये उत्तराधुनिकवैशिष्ट्येषु अन्यतमवैशिष्ट्यं प्रचलितपरम्परायाः उल्लङ्घनम्। अनुकरणं साहित्यस्याभ्यन्तरगतमूलप्रक्रिया, सकलसाहित्ये अस्य अस्तित्वः विद्यमान। साहित्यसमृद्ध्यिनि अस्य भूमिका असमान्य। पूर्वे संस्कृतकवयः संस्कृतसाहित्यस्य कवि-महाकवीनाम् अनुकरणं करोति अथवा तेषां प्रभावः परवर्तीकवीनां काव्ये रचनायां च अपश्यत्। संस्कृतसाहित्ये अनुकरणमिति केवलम् धारणायाः विषयस्य वा सूत्रवद् ग्रहणम्। किन्तु अधुना अनुकरणमित्यनेन विषयस्य ग्रन्थस्य धारणायाः शैल्या वा सम्पूर्णं ग्रहणम्। सुदीर्घसंस्कृतसाहित्यस्य इतिहासे संस्कृतकवयः कदापि संस्कृतेतरभाषासाहित्यतः किञ्चिदपि न अनुकरणं कृतम्। किन्तु इदानीं संस्कृतभिन्नसाहित्यात् साहित्यविधा-छन्दादि अनुकरणं भवति। सनेट्-हाइकु-सिजो-तन्कादि वैदेशीयछन्दसः सफलप्रयोगः अस्माभिः आधुनिकसंस्कृतसाहित्ये स्पष्टतया दृश्यते। श्रीवीरेन्द्रकुमारभट्टाचार्य-राधावल्लभत्रिपाठी-हर्षदेवमाधवादिषु रचनायां सनेट्, हर्षदेवमाधवस्य कवितायां हाइकु-सिजो-तन्कादि छन्दसः प्रयोगः दृश्यते। इमामि छन्दांसि वैदेशीया, एषां छन्दसां मूलवैशिष्ट्यानां सम्पूर्णगृहित्वा केवलं संस्कृतपदावलम्व्य काव्ये प्रयोगः क्रियते। सहस्रछन्दविद्यमाना संस्कृतसाहित्ये वैदेशीयछन्दानुकृता पद्यलेखनम्

[3] शास्त्रमन्दाकिनी, पृष्टा- १५१

उत्तराधुनिकतायाः प्रभावं दर्शयति। एतेन आधुनिककवयः संस्कृतसाहित्यस्य परम्परां लङ्खनं कृतम्। परम्परायाः खण्डनं लङ्घनं वा तावद् उत्तराधुनिकसाहित्यस्य वैशिष्ट्यम्।

उत्तराधुनिकसाहित्यस्य अपरम् एकं वैशिष्ट्यं निर्द्दिष्टविषयस्य प्रधान्यताया निर्द्दिष्टाभिमतस्य च परिहारः अस्वीकारः वा। संस्कृतसाहित्ये द्विविधं ग्रन्थं दृश्यते- (१) लक्ष्यग्रन्थाः यथा रामायण-अभिज्ञानशकुन्तल-शिवराजविजयमादिकाव्यग्नन्थाः, (२) लक्षणग्रन्थाः यथा नाट्यशास्त्र- काव्यप्रकाश- साहित्यदर्पणादिग्रन्थाः। संस्कृतलक्षणग्रन्थे तथा संस्कृतशास्त्रे निर्द्दिष्टलक्षणानुसृत्य संस्कृतकवयः स्वीय रचनायां प्रवृत्तं भवति। संस्कृतकवयः सर्वदा शास्त्रौक्तमभिमतं स्वीकृत्य स्वीय रचनाः रचयन्ति, अस्य उल्लङ्घनं कुत्रापि न प्राप्यते, प्राप्यति चेत तत्र आर्षप्रयोगः। किन्तु आधुनिककवयः काव्यसर्जनायां शास्त्रनिर्द्दिष्टलक्षणमभिमतं वा पूर्ववत् न गन्यते। यद्यपि अभिराजराजेन्द्रमिश्रप्रभृति कतिचिद् कवयः अधुनापर्यन्तं परम्परानुसृत्य काव्यं ग्रन्थन्ति, तेषां सर्जनायामपि आधुनिकतायाः प्रभावः तथा शास्त्रेतरविषयः दृश्यते। काव्यसर्जनायां आधुनिककवयः शास्त्रोक्ताभिमतस्य तदेवगूरुत्वं न दीयते यथा निजाभिमतं स्वीयाभिव्यक्तिं च दीयते। शास्त्रनिर्द्दिष्टं यत् श्लोकः कविता वा सर्वदा चतुष्पदविशिष्टं छन्देसा निबन्धं च भवेत् (पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा[4]), अधुना तु कवयः छन्दोमुक्तम् अनियतपादविशिष्ट्यञ्च कविता ररर्च। केशवचन्द्रदाश, हर्षदेवमाधव, वीरेन्द्रभट्टाचार्य, रवीन्द्रकुमारपण्डा, बनमालीविश्वाल, अरुणरञ्जनमिश्र, प्रवीणपण्ड्यादि कवयः मुक्तछन्दसां सिद्धहस्ताः। मुक्तछन्दसः उदाहरणार्थमत्र केशवचन्द्रदाशस्य अरुणरञ्जनमिश्रस्य च यथाक्रमे एकैकः पङ्क्तिः प्रस्तूयते-"नाहं निक्षिप्तकन्दुकः/ प्रत्यागमिष्यामि / भूतलं संस्पृश्य परमेको मिमिलिषुः / आषाढस्य बिन्दुः"[5], "तत्रैव तदा क्रन्दन्नासम्/ मनैकाकित्वस्य रुद्धवेलासु/ यद् यदद्य प्राप्नोभि/ मन्दिन्नं किमपि नासीत् तब जवाधरमन्मयरेखासु"[6]॥ उदहरणद्वये मुत्कछन्दसः प्रयोग भवति, गद्याकारे लिखितः कविता, अनियताक्षरमात्रापादाश्च। अनयोरुदाहरणयोः छन्दशास्त्रस्य लक्षणान् अमान्यं कृत्वा कविता सर्जनं कृतम्। उत आधुनिकनाटकादि रूपकेषु दशरुपकादि नाट्यशास्त्रस्य नाट्यलक्षणम्[7] अग्राह्यं कृत्वा कथावस्तु-नायकादेः योजना दृश्यते। आधुनिकनाटतेषु निन्मोपेक्षितविषयचरित्राणां तथा समाजिकसमस्याधारितविषयानां प्राधान्यं संलक्ष्यते इदानीम्। श्रीजीवस्य यौतुकसमस्याधारितं 'विधिविपर्यासम्', लिङ्गपरिवर्तनमाश्रित्य श्रीजीवेन लिखितं 'पुरुषरमणीयम्', शरणार्थिणां वास्तवोचितं नग्नचित्रमुपजीव्य 'शरणार्थिसंवादः' इत्यादि समकालीनसामाजिकसमस्यापुरितकथावस्त्वाश्रित्य वर्तन्ते। रेवाप्रसादद्विवेदेः 'त्रिपादी', तारापदभट्टाचार्यस्य 'मैत्रेयी', नारायनदाशस्य 'मातृस्वसा' प्रभृतिनि नाटकेषु नायकनायिका साधारणजनाः न तु प्रख्यातवंशजाताः अपि नाट्यकथावस्तु दैनन्दिनजीवाश्रित्यम्। यद्यपि सर्वस्मिन्नाटके रसस्याभावं नास्ति किन्तु नायकनायिकाकथावस्तुविषये साहित्यदर्णनादि शास्त्रनिर्द्दिष्टं लक्षणस्याभावः दृश्यते। शास्त्रप्रधान्यत्वं शास्त्रस्य गुरुत्वं वात्र परिहारविषये चेष्टा परिलक्ष्यते। निर्द्दिष्टाभिमतस्य परिहारं तावदुत्तराधुनिकतायाः वैशिष्ट्यम्।

---

[4] छन्दोमञ्जरी- १/४

[5] ईशा, पृष्ठ - १

[6] तव जवाधरमन्मयरेखासु, पृष्ट-५१

[7] साहित्यदर्पणः, कारिका- ६.७-६.१०

उत्तराधुनिकसाहित्यस्य अपरमेकं वैशिष्ट्यं यद् इदं साहित्यलेखनविधारूपभेदं निराकरोति। साहित्यलेखनविषये सर्वस्मिन् साहित्ये निर्द्दिष्टनियमाः सन्ति, कदा ताः शास्त्रे लिखितरूपेण तिष्ठन्ति कदापि अलिखितरूपेण विद्यन्ति किन्तु अवश्यमेव तिष्ठन्ति। उत्तराधुनिकसाहित्ये एषां नियमानां पालनं न भवति। संस्कृतसाहित्ये वर्तमाने अस्य दर्शनं सुलभम्। बनमालीविश्वालस्य "वेलेन्टाइन डे" इति कवितायाः नामकरणमस्य प्रकृष्टोदाहरणम्। कविना अत्र कविताया नामकरणे आङ्गलशब्दस्य संस्कृते रूपान्तरं न करोति। संस्कृतसाहित्यशास्त्रे आङ्गलशब्दस्य तथा संस्कृतेतरशब्दस्य ग्रहनयोग्यता नास्ति, उत व्याकरणानुसारतः अपाद न प्रयोगयोग्यम्, सुवन्त-तिङ्गन्तयुक्तपदमेव प्रयोगयोग्यम्। यद्यपि आधुनिककवयः स्वाच्छन्दतया संस्कृतेतरशब्दस्य प्रयोगकरोति, किन्तु तत्र संस्कृतरूपान्तरं दृश्यते। "वेलेन्टाइन डे" इति कवितायां संस्कृतसाहित्यलेखने नुतनशैल्याः प्रयोगं करोति तथा साहित्यलेखनविधारुभेदं निराकरोति। उत्तराधुनिकसाहित्यं प्रचलितसाहित्यविधानां परिहारकृत्वा नवीन साहित्यविधायां अभिसरति। यथा – टुप्कथा, रहस्यकथा, हास्यकथा इत्यदि अत्र उल्लेखार्हा। नवीनताया अन्वेषणाय उत्तराधुनिककवयः वहुवारं प्रादेशीय-वैदेशीयसाहित्यानुसरणेऽपि न द्विधाग्रस्तं भवन्ति।

उत्तराधुनिकसाहित्ये अन्यमेकं वैशिष्ट्यं प्राप्यते। उत्तराधुनिकसाहित्ये विविधशाहित्यविधायाः संमिश्रणं भवति तथा साहित्यविधानां मध्ये यत् पार्थक्यं विभाजनं भेदं वा अस्ति तेषाम् अस्पष्टं करोति। पूर्वकाले खण्डकाव्य-स्तोत्रकाव्यं नाम्ना द्वे काव्यविधे स्तः। खण्डकाव्यं सामान्यतता आकारे दीर्घं, स्तोत्रकाव्यं तु आकारे नातिदीर्घं भवति। अधुनासाहित्ये कविता एका प्रसिद्धकाव्यविधा दृश्यते। आधुनिककवितायां स्तोत्रकाव्यादृशाकारसाम्यता अस्ति किन्तु स्तोत्रकाव्यस्यान्यतमवैशिष्ट्येषु स्तुतिपरकत्वं नास्ति। आधुनिककवितायां खण्डकाव्यस्य आकारत्वं नास्ति किन्तु वस्तु-रसादि साम्यता दृश्यते। आधुनिककविता खण्ड-लहरी-स्तोत्रकाव्यविधावैशिष्ट्यानां संमिश्रणं भवति तथा एतेषां काव्यविधानां भेदानां निष्प्रभमस्पष्टं वा करोति। टुप्कथा-रहस्यकथा-स्पशकथादिसर्जनायामपि विविधकाव्यविधानां वैशिष्ट्यानां संमिश्रणं दृश्यते।

साहित्यं सर्वदा युगानुसारी समाजानुकारी रुच्यनुसारी च भवति। आधुनिक-उत्तराधुनिकप्रभृतिमतवादस्य भित्तिभुमिरपि सामाजः। सामाजिकास्थिरता परिवर्तनशीलता समस्या च साहित्यनिर्माणे गभीरं प्रभावं स्थापयति। कविः न समाजवहिर्भुता कोऽपि, समाजगत विविधव्यापारः तस्योपरि अपि प्रभावं विस्तृतं करोति। पुर्वे सामाजिक रीति-नीति-शिक्षा-मूल्यादिव्यापाराः भिन्नमासीत्, तदा तदनुरुपं साहित्यम् अरचयत्। वर्तमाने सामाजिकव्यवहारादिव्यापारेषु धारणातीतं परिवर्तनम् आगच्छति, अतः आधुनिकसाहित्ये तस्य प्रतिबिम्वः स्पष्टतया द्रष्टुं शक्यते। अधुनाकाले तथ्यस्य सहजप्राप्तिः यान्त्रिकोन्नतिः विश्वायनं च तथा देशीयविदेशीयसाहित्येन सह आधुनिककवीनां गहनसंयोगवशात् आधुनिकसंस्कृतसाहित्ये नानापरिवर्तनं दृश्यते। संस्कृतसाहित्यस्य परम्परागतधारया साकं नवीनसाहित्यधाराऽपि इदानीं समभावेन प्रवाहिता दृश्यते। आधुनिकसंस्कृतसाहित्ये यानि नवीनवैशिष्ट्यानि प्राप्यते तस्य कारणं किं तद् निर्द्दिष्टकरणं जटिलम्। किन्तु तेषां वैशिष्ट्यानां यथोपयुक्तं समीक्षया, तेषां वैशिष्ट्यानां कारणेन सह सम्वन्धयुक्तसिद्धान्तानां धारणा सहजतया कर्तुं शक्यते। उत्तराधुनिकतावाद एक अभारतीयसिद्धान्तः, यस्य प्रभावः विश्वस्य सर्वस्मिन् साहित्ये परिलक्ष्यते। आधुनिकसंस्कृतसाहित्ये अपि अस्य कञ्चित् कञ्चित् लक्षण इदानीं दृश्यते।

अत्र उत्तराधुनिकता इत्यनेन आधुना परवर्ती कालं न ज्ञायते, "उत्तराधुनिक" (Postmodernism) इति सिद्धान्तं प्रवृत्तिं वा वोध्यते। आधुनिक एक आपेक्षिकः शब्दः। अत्र "आधुनिक" इति शब्देन समकालीनं साम्प्रतम् अद्यतनं वा साहित्यम् अनुधावनीयं, न तु एतद् अतिरिच्यम्। आधुनिकशब्देन आधुनिकता आधुनिकतावाद वा न ग्रहनीयम्। संस्कृतसाहित्ये प्रायशः हि आधुनिकतावादेन सह आधुनिकसाहित्यं समकालीनसाहित्यम् अर्वाचीनसाहित्यं च समभावेन पर्यायवाचीरूपेण वा प्रयोगं परिलक्ष्यते। आधुनिक-आधुनिकतावादयोर्मध्ये पार्थक्यं विद्यते। आधुनिकता इत्यनेन आङ्गलसाहित्ये Modernism, Modernity, Modernization इत्यादिका वोध्यते। आधुनिक एक आपेक्षिकशब्दः, आधुनिकशब्देन निर्द्दिष्टकालखण्डं ज्ञायते।

वर्तमाने संस्कृतसाहित्ये उत्तराधुनिकता एका नवीनविषयः। अस्य विषये आलोचनासमालोचनागवेषणायाः प्रयोजनमापेक्षते। केचन विद्वांसः उत्तराधुनिकतां समालोचना कृत्वा अस्वीकरोति। किन्तु अर्वाचीनसंस्कृतसाहित्ये उत्तराधुनिकतायाः चिन्हं स्पष्टम्। समकालीनसंस्कृतप्रसिद्धविद्वत्सु मूर्धण्यराधावल्लभत्रिपाठी महोदयेन अरुणरञ्जनमिश्रं "उत्तराधुनिककवि" इत्याख्यायां भूषिता[8]। डॉ. शुभ्रजित् सेनमहोदयेन तस्य "भारतवर्षे आधुनिकसंस्कृतसाहित्यम् : विहङ्गमदृष्ट्या परिशीलनम्" इति ग्रन्थे अरुणरञ्जनमिश्रं उत्तराधुनिककविनाभिहिताः[9]। 'शास्त्रमन्दाकिनी' ग्रन्थे मण्टुकुमारजाना "समसामयिके संस्कृतवाङ्मये उत्तराधुनिकभावधारा" इति शोधप्रपत्रे संस्कृतसाहित्ये उत्तराधुनिककविविषये उत्तराधुनिकताविषये च आलोचना कृतवान्[10]। अतः उत्तराधुनिकतायाः अस्वीकारः यक्तियुक्तं न दृश्यते।

वैचित्रमयत्वं परिवर्तनशीलत्वं नूतनत्वञ्च संस्कृतसाहित्यस्य मूलवैशिष्ट्येषु प्रधानं वैशिष्ट्यम्। वर्षाकाले अरण्ये यदा नूत्नलतावृक्षाः उद्भवन्ति, तदा कालचक्रप्रभावेन समये समये साहित्येऽपि प्राचीनवैशिष्ट्यानां परिवर्तनं तथा नवीनवैशिष्ट्यानां संयोजनं समागमं वा भवति। संस्कृतसाहित्यस्य परिवर्तनशीलत्वं नूतनत्वञ्च वैशिष्ट्यरुपद्वारेण एव संस्कृतसाहित्ये उत्तराधुनिकवैशिष्ट्यानां प्रवेशः। अर्वाचीनसंस्कृतसाहित्ये उत्तराधुनिकतायाः चिन्हरूपा तस्याः वैशिष्ट्यानां विहङ्गमदृष्ट्या आलोचनं कृतम्। परिशेषे उत्तराधुनिकप्रभावेन संस्कृतसाहित्ये यानि साहित्यकर्माणि भविष्यन्ति, तेभिः संस्कृतसाहित्यस्य समृद्धिः भविष्यति इति अपेक्षितुं शक्यते।

**सन्दर्भग्रन्थसूची**


- दास, देवकुमार. संस्कृत साहित्येर इतिहास, श्रीवलराम प्रकाशनी, कोलकाता, २०१२.
- घोषाल, वनविहारी. अर्वाचीन संस्कृतसाहित्येर इतिहास(१८०१-२९०२०), पारुलप्रकाशन, कोलकाता,२०२१.
- सेन, शुभ्रजित्. भारतवर्षे आधुनिकसंस्कृतसाहित्यम् : विहङ्गमदृष्ट्या परिशीलनम्, संस्कृतपुस्तकभाण्डारः, कोलकाता,२०१९.
- मिश्र, अरुणरञ्जन. नेत्रप्रान्ते निष्पन्दसमयः, दि वनारस मर्काण्टाइल को., कोलकाता,२०१९.
- मिश्र, अरुणरञ्जन. तव जवाधरमन्मयरेखासु, दि वनारस मर्काण्टाइल को., कोलकाता,२०१८.


[8] नेत्रप्रान्ते निष्पन्दसमयः, प्रस्तावना,पृष्ठा- II

[9] भारतवर्षे आधुनिकसंस्कृतसाहित्यम् : विहङ्गमदृष्ट्या परिशीलनम्, पृष्ठा-१५५

[10] शास्त्रमन्दाकिनी, पृष्ठा- १५०

- (सम्पा) शास्त्री,शालिग्राम. साहित्यदर्पणः (विश्वनाथ), मोतिलाल बनारसीदास, दिल्ली,२०१६. (नवमसंस्करणः).
- शर्मा, मञ्जुलता. आधुनिक संस्कृत काव्य की परम्परा, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०११.
- (सम्पा.) शर्मा, मञ्जुलता. अर्वाचीन संस्कृत साहित्य : दशा एवं दिशा, परिमल पाब्लिकेशन, दिल्ली,२००४.
- (सम्पा.) त्रिपाठी, ब्रह्मानन्द. छन्दोमञ्जरी(गङ्गादास), चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०२१.
- (Ed.) Rout, Dharmananda. Subhrajit Sen, Bhaskar Gangopadhyay. Śāstramandākinī, Shivalik Publication, New Delhi, २०२१.
- (Ed.) Mishra, Sashibhusan. Post-Modernist Poet A. R. Mishra (in the Eyes of Critics), The Banaras Mercantile Company, Kolkata, 2021.